कक्षा-12　　　　मुद्रित पृष्ठों की संख्या : 8

# 2026

## विषयः-संस्कृतम्

समय:3घण्टे　　　　**खण्ड क (अपठितांश-अवबोधनम्)**　　　　पूर्णांक : 80

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

डॉ. जगदीशचन्द्रबसुः महोदयस्य जन्म नवम्बरमासस्य त्रिंशत् दिनाँके 1858 तमे वर्षे ढाकानगरे अभवत्। महान् वैज्ञानिकः जगदीशचन्द्रः प्रकृत्या चिन्तनशीलः विज्ञानप्रेमी प्रकृतिप्रेमी च आसीत्। अनेन बेतार यन्त्रस्य आविष्कारः कृतः एवञ्च अनेन 'रसोनेण्ट रेकार्डर' इति यन्त्रेण वृक्षेषु चैतन्यशक्तेः प्रत्यक्षं प्रदर्शनं कृतम्। विविधप्रयोगान् कृत्वा तेन प्रदर्शितं यत् जीवजन्तूनिववृक्षेष्वपि जीवनीशक्तिः वर्तते। अयं पुनः एकस्य यन्त्रस्य निर्माणं कृतवान्। एतस्य नाम 'क्रेसकोग्राफ' इत्यस्ति। इदं यन्त्रम् अतिसूक्ष्मपदार्थानाम् अपि साक्षात्कारं कारयति। महान् वैज्ञानिकः बसुमहाभागः कोलकातायां 'बसुविज्ञानमन्दिरम्' इति संस्थायाः स्थापनामकरोत्। स्ववैदुष्येन बसुः विश्वे चर्चितः प्रसिद्धः च अभवत्। 1937 तमे वर्षे बसुमहाभगस्य निधनम् अभवत्। यद्यपि अधुना बसुः अस्माकं मध्ये नास्ति किन्तु तस्य कार्याणि अद्यापि अस्मभ्यं प्रेरणास्पदानि सन्ति।

**क. – एकपदेन उत्तरत**　　2x1=2

(1) बसुमहाभागः कस्य स्थापनामकरोत् ?

(2) 'क्रेसकोग्राफ' इति यन्त्रंकस्य साक्षात्कारं कारयति ?

**ख. – पूर्णवाक्येन उत्तरत**　　2x2=4

(1) 'रसोनेण्ट रेकार्डर'अनेन किं भवति ?

(2) प्रकृतिप्रेमी कः आसीत् ?

**ग. – निर्देशानुसारं प्रश्नान् उत्तरत**　　3x1=3

(1) 'आसीत्' अत्र कः लकारः ?

(2) 'अधुना' अस्य विलोमपदं किम् ?

(3) 'वृक्षेषु' अत्र का विभक्तिः ?

**घ. – अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ?**　　1x1=1

**खण्ड ख (रचनात्मक कार्यम्)**

Visit CollegeDekho

2. भगिन्याः विवाहे सम्मिलितार्थम् अधोलिखिते प्रधानाचार्यं प्रति अवकाशपत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां पूरयत-10x1/2=5
(भगिनी के विवाह में सम्मिलित होने के लिये प्रधानाचार्य को लिखित प्रार्थना पत्र को मञ्जूषा में दिये गये शब्दों की सहायता से पूर्ण कीजिए)

मञ्जूषा

| |
|---|
| असमर्थः, प्रार्थनापत्रम्, कक्षायाः, एकदिवसस्य, सेवायाम्, निवेदनम्, अद्य, अनुग्रहीष्यन्ति रघुनाथः, द्वाराहाटम् |

(1).....................

प्रधानाचार्यः

राजकीयः माध्यमिक-विद्यालयः

दूनागिरी (द्वाराहाटम्)

जनपद-अल्मोडा

विषयः- अवकाशप्रदानार्थम् (2).....................।

महोदयः

सविनयं (3)...................इदमस्ति यत् अहं भवतः विद्यालये नवमी (4)..................छात्रोऽस्मि। (5).................... मम भगिन्याः विवाहः अस्ति। अतः अहम् अद्य विद्यालयमागन्तुं (6)..................अस्मि। कृपया माम् (7).........................अवकाशं स्वीकृत्य (8)...................... भवन्तः।

सधन्यवादः।

दिनाङ्काः 05.05.2025 आज्ञाकारीशिष्यः

स्थानम् –(9)…………… (10).............

3. अधोदर्शितं चित्रमधिकृत्य पञ्चवाक्यपरिमितम् एकम् अनुच्छेदं संस्कृतेन लिखत- 05
(नीचे बने चित्र को आधार बनाकर आठ वाक्यों का एक अनुच्छेद संस्कृत में लिखिए)

फूलदेही-पर्वः

Visit CollegeDekho



अथवा

अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यपरिमितं एकम् अनुच्छेदं संस्कृतेन लिखत–
(नीचे लिखे किसी एक विषय को आधार बनाकर पाँच वाक्यों का एक अनुच्छेद संस्कृत में लिखिए)

(क) नन्दादेवी

(ख) हरेलापर्वः

(ग) हिमालयः

(घ) कृत्रिमबुद्धिमत्ता(AI)

4. मञ्जूषायां प्रदत्त शब्दसूची सहाय्येन अधोदतां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत– 10x1/2=5

( मंजूषा में दिये गये शब्दों की सहायता से कहानी को पूर्ण कर अपनी उत्तर पुस्तिका में लिखिए)

अस्ति मगधतीरे चम्पकवती नाम (१) ..................। तस्यां चिरान्महता स्नेहेन (२)................ निवसतः। स च मृगः (३)...............भ्राम्यन्हृष्टपुष्टाङ्गः केनचित् शृगालेनावलोकितः। तं दृष्ट्वा शृगालोऽचिन्तयत्-'आः कथमेतन्मांसं सुललितं भक्षयामि ? भवतु, (४)................तावदुत्पादयामि।'इति (५).............उपसृत्य अब्रवीत्– 'मित्र कुशलं ते मृगेणोक्तम् कस्त्वम् ? सः ब्रूते क्षुद्रबुद्धिनामा जम्बूकोऽहम्' अत्र अरण्ये (६).................मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा (७)................। मृगेणोक्तम् 'एवमस्तु'। ततः पश्चादस्तंगते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको (८).................चिरमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत्– सखे चित्राङ्ग! कोऽयं द्वितीयः?। मृगो ब्रूते 'जम्बूकोऽयम्'। अस्मत्सख्यमिच्छन्नागतः।(९).............. ब्रूते – मित्र अकस्मात् आगन्तुना सह(१०)..............न युक्ता।

यथा चोक्तम्–अज्ञातकुलशीलस्य वासोदेयो न कस्यचित्।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥

**मञ्जूषा**

| |
|---|
| मृगकाकौ, अरण्यानी, मैत्री, विश्वासं, मृगस्य, बन्धुहीनो, स्वेच्छया, काको, भवितव्यम्, आलोच्य |

Visit CollegeDekho

अथवा5x1=5

गौराङ्गः – भवान्कस्मिन्..................?
शिवाङ्ग – अहं दिल्लीविश्वविद्यालये पठामि।
गौराङ्गः – दिल्ली विश्वविद्यालये तु .....................।
शिवाङ्गः – त्वम् कस्मिन् महाविद्यालये.................. ?
गौराङ्गः – ..............................पठामि।
शिवाङ्गः – तत्र हिन्दू महाविद्यालयः समीपे अस्ति।
गौराङ्गः – तत्र विविधेषु राज्येषु..................समागच्छन्ति।
शिवाङ्ग – अत्र भारतस्य लघुदर्शनं भवितुं शक्यते।

मञ्जूषा

| |
|---|
| अहं हिन्दू महाविद्यालये,विश्वविद्यालये पठति,अहम् अपि पठामि, पठसि, छात्राः पठनाय |

**खण्ड ग (अनुप्रयुक्त व्याकरणम्)**

5. उचितं विकल्पं चित्वा लिखत। 4x1=4
(उचित विकल्प चुनकर लिखिए)
(क) 'प्रविष्टोऽस्मि' इति पदस्य सन्धिविच्छेदः वर्तते–

(अ) प्र+विष्टोऽस्मि (ब) प्रवि+ इष्टः+स्मि
(स) प्रविष्टः+अस्मि (द) प्रविष्ट्+स्मि

(ख)'यानि+अस्माकम्' इत्यस्य सन्धिः भवति–

(अ) यास्माकम् (ब) यान्यस्माकम्
(स) योस्माकम् (द) यानि अस्माकम्

(ग) यथा+औषधम्= यथौषधम् अत्र सन्धिः भवति–
(अ) गुणसन्धिः (ब) वृद्धिसन्धिः
(स) अयादिसन्धिः (द) यण् सन्धिः

(घ)'सहस्रैरपि' इति पदे सन्धिविच्छेदः भवति–
(अ)सहस्रैः + अपि (ब) सह +अस्रैरपि
(स) सहस्रैर् + पि (द) स + हस्ते + अपि

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहाः लेखनीयाः–4x1=4

(नीचे लिखे वाक्यों में रेखाङ्कित पदों के विग्रह लिखिए)
(क) आचार्यः <u>अन्तेवासिनम्</u> अनुशास्ति।
(ख) सत्याय <u>मितभाषिणाम्</u>।
(ग) सन्ध्योपासन समये भवादृशानां <u>प्रवेशसमयो</u> भवति।
(घ) एषा <u>वेदोपनिषत्</u>।

7. प्रकृति-प्रत्ययविभागः क्रियताम् ? 4x1=4

Visit CollegeDekho

(प्रकृति-प्रत्यय का विभाग कीजिए ?)

(क) अधिकृत्य

(ख) विधाय

(ग) प्रवृत्तिः

(घ) संवीक्ष्य

अथवा

प्रकृति-प्रत्ययसंयोजनं क्रियताम्– (प्रकृति-प्रत्यय का संयोग कीजिए)

(क) वि + ईक्ष् + क्त्वा >ल्यप् = ................

(ख) स्था + तुमुन् = ..................

(ग) अनु+शास्+ल्युट् = .............

(घ) हन् + तव्यत् = ..................

8. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम् – 4x1=4

(अधोलिखित वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थानों की पूर्ति कीजिए)

(क) ................अन्वयं वक्ष्ये। (रघु)

(ख) प्रवृत्तिं च ..............च जना न विदुरासुराः। (निवृत्ति)

(ग) आह्लादितं कुलं सर्वं यथा.............. शर्वरी। (चन्द्र)

(घ) यत्कृते महति क्लेशे .......... मे न मनोरथः। (राज्य)

9. अधोलिखितेषु वाच्यपरिवर्तनं क्रियताम्-4x1=4

(नीचे लिखे वाक्यों के वाच्य परिवर्तन कीजिए)

(क) तेन भोजनं पच्यते। (कर्तृवाच्य)

(ख) बालकः विद्यालयं गच्छति। (कर्मवाच्य)

(ग) सः पुस्तकं लिखति। (कर्मवाच्य)

(घ) मया फलं खाद्यते।(कर्तृवाच्य)

**खण्ड घ(i)(पठितावबोधनम्)**

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत–

(नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

"दौवारिक!शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति वदसि?"इति वक्तारमपश्यतैवाऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिःपृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति" इत्येवं भाषमाणेन द्वाःस्थेन क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि इति कथयन् द्वादशवर्षेण केनापि भिक्षावटुनानुगम्यमानः कोऽपि काषायवासाः धृततुम्बीपात्रः भव्यमूर्तिः सन्यासी दृष्टः।

(क) **एकपदेन** उत्तरत–2x1/2=1

i. 'आगत्य च निखिलं निवेदयामि' इति केन उक्तम् ?

Visit CollegeDekho

ii. हन्तव्य इति कस्य आदेशः ?

(ख) **पूर्ण वाक्येन** उत्तरत–2x1=2

i. सन्यासी कीदृशः आसीत् ?

ii. प्रभुवर्याणामादेशः किम् अस्ति ?

(ग) **निर्देशानुसारम्** उत्तरत–2x1=2

(1) 'इत्येवम्' इति पदस्य सन्धिविच्छेदः क्रियताम् ?

(2) 'दृष्टः' अत्र कः प्रत्ययः ?

11.अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-

(नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए)

गुणी गुणं वेत्ति न वेत्ति निर्गुणः,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको बसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः॥

(क) **एकपदेन** उत्तरत–2x1/2=1

i. वायसः कस्य गुणं नास्ति?

ii. सिंहस्य बलं कः जानाति?

(ख) **पूर्णवाक्येन** उत्तरत–2x1=2

i. बलं कः वेत्ति, कः न वेत्ति ?

ii. सिंहः केन विभाति?

(ग) **निर्देशानुसारम्** उत्तरत–2x1=2

i. 'वेत्ति' इति क्रियापदस्य प्रकृति-प्रत्ययं लिखत।

ii. 'बलम्' इति पदस्य विलोमपदं किम्।

12.अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–

(नीचे लिखे नाटक के अंश को पढ़कर प्रश्नों के उत्तर लिखिए)

काञ्चुकीयः – परित्रायतां परित्रायतां कुमारः।

रामः – आर्य! कः परित्रातव्यः।

काञ्चुकीयः – महाराज!

रामः – महाराजः इति। आर्य! ननु वक्तव्यम्। एकशरीर-संक्षिप्ता पृथवी रक्षितव्येति। अथ कुत उत्पन्नोऽयं दोषः?

काञ्चुकीयः – स्वजनात्।

रामः – स्वजनादिति। हन्त! नास्ति प्रतीकारः।

शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।
कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति॥

**(क) एकपदेन उत्तरत–** 2x1/2=1

Visit CollegeDekho

(1)कस्य प्रतीकारः नास्ति ?

(2)एकशरीरसंक्षिप्ता का रक्षितव्या ?

**(ख) पूर्णवाक्येन उत्तरत–** 2x1=2

(1)कः शरीरे प्रहरति, कः हृदये ?

(2)कः रामाय लज्जाम् उत्पादयिष्यति ?

**(ग) निर्देशानुसारेण उत्तरत–** 2x1=2

(1)'प्रहरति' इति क्रियापदे कः लकारः ?

(2)'वक्तव्यम्' इति पदस्य प्रकृति-प्रत्यय-विच्छेदः क्रियताम् ?

13.अधोप्रदत्तभावार्थत्रये शुद्धं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत-3x1=3

(नीचे दिये खण्डों में, तीन भावार्थों में से शुद्ध भावार्थ का चयन कर लिखिए)

(क) विद्यावतां वस्तुत एव रूपम्।

**भावार्थ**

(1) विद्या एव वास्तविकं रूपं भवति।

(2) विद्वान् रूपवान् भवति।

(3)सौन्दर्यं वास्तविकं रूपं भवति।

(ख) स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्।

**भावार्थ**

(1)स्वाध्याये प्रवचने प्रमादं करणीयम्।

(2)अध्ययने प्रवचने च आलस्यं न करणीयम्।

(3)अध्ययनं लेखनं च प्रतिदिनं करणीयम्।

(ग) अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्।

**भावार्थ**

(1) राजोद्यानं विश्वावसोः पार्श्वे अस्ति।

(2)गन्धर्वराजविश्वावसोः नगरं शोभते।

(3)गन्धर्वराजविश्वावसोः राजोद्यानं सुन्दरम् अस्ति।

14.मञ्जूषा साहाय्येन श्लोकान्वयं पूरयित्वा लिखत–3x1=3

(मञ्जूषा की सहायता से श्लोक के अन्वय को पूर्ण कर लिखिए)

सहस्त्रैः शिक्ष्यमाणः अपि दुर्जनः (१)..........सज्जनतां न उपैति। चिरं (२).............निमग्नः अपि मन्दरः (३) ................न अभ्युपैति।

**मञ्जूषा**

| |
|---|
| मार्दवं, शठः, सुधा-समुद्रे |

Visit CollegeDekho

15.अधोलिखितानां **अ** स्तम्भस्य वाक्यांशानां **ब** स्तम्भस्य वाक्यांशैः सह सार्थकं संयोजनं कुरुत– 4x1=4

(नीचे लिखे 'अ' स्तम्भ में दिये गये वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ सार्थक संयोजन कीजिए)

| **स्तम्भ अ** | **स्तम्भ ब** |
|---|---|
| (1) सर्वस्य लोचनं शास्त्रं | (क) हृदये स्वजनस्तथा। |
| (2) आह्लादितं कुलं सर्वं | (ख) प्रज्ञया सदृशागमः। |
| (3) आकार सदृशः प्रज्ञः | (ग) यथा चन्द्रेण शर्वरी। |
| (4) शरीरेऽरिः प्रहरति | (घ) यस्य नास्त्यन्ध एव सः। |

**अथवा**

अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसंगानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत–
(नीचे लिखे वाक्यों में रेखाङ्कित पदों का प्रसंग के अनुसार उचित अर्थ कोष्टक से चुनकर लिखें)

(क) यस्याः शक्रसमो भर्ता । (इन्द्रसमः/रामसमः/नृपसमः)

(ख) सत्याय मितभाषिणाम्। (दीर्घभाषिणाम्/अल्पभाषिणाम्/मृदुभाषिणाम्)

(ग) तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। (धैर्यम्/धृष्ठः/धारीवान्)

(घ) वीक्ष्य प्रभा हसित चाकपुरन्दराणाम्। (गत्वा/हसित्वा/दृष्ट्वा)

**खण्ड खण्ड घ(ii) (संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः)**

16.उत्तराणि लिखत– 3x1

(क) **अनुशासनम्** पाठः कस्मात् ग्रन्थात् गृहीतः ?

(ख)**दौवारिकस्य निष्ठा** पाठस्य लेखकः कः ?

(ग)**प्रतिमानाटकस्य** लेखकः कः ?

17. अधोलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचितशब्दैः रिक्तस्थानपूर्तिः क्रियताम् –3x1
(नीचे लिखे काव्यों को कोष्टक में दिये गये शब्दों की सहायता से पूर्ण कर लिखिए)

(क)गद्यपद्यमयं ...........। (समवकार/डिम/चम्पूः)

(ख) गद्यं ............ निकषं वदन्ति। (विदुषां/ कवीनां/ जनानां)

(ग) महाकाव्यस्य नायकः.........गुणान्वितः भवति। (धीरोदात्त/ धीरललित/ राक्षस)

18 उचितं विकल्पं चित्वा लिखत। 4x1

(उचित विकल्प चुनकर लिखिए)

(क) नाटकं भवति ?

(अ) दृश्यकाव्यम् (ब) श्रव्यकाव्यम्

Visit CollegeDekho

(स) चम्पूकाव्यम्　　　　(द) उपन्यासम्

(ख) नाटकस्य प्रारम्भे भवति ?

(अ) जनान्तिकम्　　　　(ब) नान्दी
(स) स्वगतम्　　　　(द) प्रस्तावना

(ग) नाटकस्य विभाजनं भवति–

(अ) सर्गेषु　　　　(ब) खण्डेषु
(स) पाठेषु　　　　(द) अङ्केषु

(घ) काव्येषु .............रम्यं भवति–

(अ) भाण　　　　(ब) व्यायोग
(स) नाटकम्　　　　(द) महाकाव्यम्

...............................................................................

Visit CollegeDekho